# shrIgurugajAnanAShTakam

# શ્રીગુરુગજાનનાષ્ટકમ્

## Document Information

Text title : Guru Gajanana (Dasganu) Ashtakam 2

File name : gurugajAnanAShTakam2.itx

Category : deities_misc, gurudev, varadAnanda, aShTaka

Location : doc_deities_misc

Author : Swami Varadananda Bharati (Pracharya A. D. AThavale)

Transliterated by : Arun Parlikar

Proofread by : Arun Parlikar

Description/comments : bhAvArchanA

Acknowledge-Permission: Shri Dasganu Maharaj Pratishthan, Gorte https://www.santkavidasganu.org

Latest update : June 3, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 4, 2023

*sanskritdocuments.org*

# શ્રીગુરુગજાનનાષ્ટકમ્

(દ્વિતીયં )
ૐ શ્રી
॥ શ્રીશઙ્કર ॥

લોકાન્ ભવોપહતસર્વવિચારશક્તીન્
　અન્ધાશ્ચ મોહતમસા મરણાભિભૂતાન્ ।
ઉદ્ધર્તુમેવ ધૃતમાનવવિગ્રહં તં
　શ્રીમદ્ગજાનન ગુરું શિરસા નમામિ ॥ ૧॥

શાસ્ત્રૈરનાકલિતમસ્તિ મહો યદીયં
　સમ્બોધિતં શ્રુતિભિરાકલને ચ નેતિ ।
આવિર્બભૂવ સગુણં ત્વિહ તત્ પરં તં
　શ્રીમદ્ગજાનનગુરું શિરસા નમામિ ॥ ૨॥

યદ્દર્શનાદ્ભવતિ ફુલ્લતરં હૃદબ્જ-
　મન્તર્દધાત્યુડુગણં મદમોહરૂપમ્ ।
અજ્ઞાનઘોરતિમિરસ્ય દિવાકરં તં
　શ્રીમદ્ગજાનનગુરું શિરસા નમામિ ॥ ૩॥

કુણ્ઠં મનો ભવતિ યદ્વિષયે વિચારે
　મૂકાયતે ચ રસના સ્તવને પ્રવૃત્તા ।
તં ભક્તિગમ્યમમૃતં ત્રિગુણૈરતીતં
　શ્રીમદ્ગજાનનગુરું શિરસા નમામિ ॥ ૪॥

સચ્ચિત્સુખં પરમમઙ્ગલમાત્મરૂપં
　જાગ્રત્સુષુપ્તિરહિતં સતતં તુરીયમ્ ।
ધ્યાનસ્થિતં પદનતાર્તિવિનાશિનં તં
　શ્રીમદ્ગજાનનગુરું શિરસા નમામિ ॥ ૫॥

પાદોદકેન ખલુ યેન સુધામયેન
    શ્રીજાનરાવમરણં કૃપયા નિરસ્તમ્ ।
માર્કણ્ડભક્તવરદં શિવરૂપિણં તં
    શ્રીમદ્ગજાનનગુરું શિરસા નમામિ ॥ ૬॥

વાપી જલેન રહિતા ચ ચકાર પૂર્ણાં
    યો વારિણા સુમધુરેણ નિજપ્રભાવાત્ ।
ભક્ત્યાચ શુષ્કહૃદયં સજલં કરોતિ
    શ્રીમદ્ગજાનનગુરું શિરસા નમામિ ॥ ૭॥

ભક્તિર્દૃઢાસ્તુ હૃદયે સતતં મદીયે
    મા મે મનો ભવતુ મોહવશં કદાપિ ।
શ્લોકૈરતો વસુમિતૈર્ગણુદાસદાસઃ
    શ્રીમદ્ગજાનનગુરું સદયં સ્તુનોતિ ॥ ૮॥

ઇતિ સ્વામી વરદાનન્દભારતીવિરચિતં શ્રીગુરુગજાનનાષ્ટકં સમ્પૂર્ણમ્ ।

ભાવાર્ચના (પ્રાચાર્ય અ. દા. આઠવલે)

https://www.santkavidasganu.org, https://www.youtube.com/@varad-vani1496

Encoded and proofread by Arun Parlikar

*shrIgurugajAnanAShTakam*
pdf was typeset on June 4, 2023

Please send corrections to *sanskrit@cheerful.com*